# shrIkRiShNacharitam

# શ્રીકૃષ્ણચરિતમ્

## Document Information

Text title : shrIkRiShNacharitam from Gargasamhita

File name : kRiShNacharitamgargasamhitA.itx

Category : vishhnu, krishna, stotra, vishnu

Location : doc_vishhnu

Transliterated by : Vishwas Bhide vrbhide at rediffmail.com

Proofread by : Vishwas Bhide, PSA Easwaran

Description-comments : gargasamhitA

Acknowledge-Permission: Vishwas Bhide http://satsangdhara.net/

Latest update : February 3, 2016

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# શ્રીકૃષ્ણચરિતમ્

કેતુમાલવાસિન ઊચુઃ -
આસીત્તુ શેષશયનો જગદાર્ત્તિહારી
    સાક્ષાત્પ્રધાનપુરુષેશ્વર આદિદેવઃ ।
યઃ પ્રાર્થિતઃ સુરવરૈર્ભુવનાવનાય
    તસ્મૈ નમો ભગવતે પુરુષોત્તમાય ॥ ૧॥

જાતો ગતઃ પિતૃગૃહાત્પિતરૌ વિમોક્ષ્ય
    નન્દાલયં શિશુતનુઃ સ તુ નન્દપત્ન્યા ।
સંલાલિતઃ સઘૃણયા બહુમઙ્ગલશ્રીઃ
    પ્રાણપ્રહારમકરોત્કિલ પૂતનાયાઃ ॥ ૨॥

બાલો બભઞ્જ શકટં શયનં પ્રકુર્વન્
    દૈત્યં નિપાત્ય મહદદ્ભુતકં ચ પૃષ્ઠે ।
માત્રે પ્રદર્શ્ય નિજરૂપમલઙ્કૃતોઽભૂદ્-
    ગર્ગેણ સઙ્કુથિતસુન્દરભાગ્યલક્ષ્મીઃ ॥ ૩॥

સંલાલિતો વ્રજજનૈર્નવનીતચૌરઃ
    શ્યામો મનોહરવપુર્મૃદુલઃ સ બાલઃ ।
ભિત્વા જઘાસ દધિપાત્રમતીવ દધ્નો
    વૃક્ષૌ બભઞ્જ જનનીલઘુદામબદ્ધઃ ॥ ૪॥

વૃન્દાવને સ વિચરન્ સહ વત્સગોપૈ-
    ર્વત્સાસુરં ચ વિનિપાત્ય કપિત્થવૃક્ષૈઃ ।
સદ્યો વિગૃહ્ય ખરતુણ્ડપુટે ચ દોર્ભ્યાં
    દૈત્યં દદાર સ બકં તૃણવત્તટિન્યામ્ ॥ ૫॥

સન્ધારયંશ્ચ શિશુભિર્બહુવત્સસઙ્ઘાન્
    વેણું ક્વણન્મદનમોહનવેષભૃદ્ધઃ ।
ગોપાનઘાસુરમુખે પ્રહિતાઞ્જુગોપ

ગોગોપવત્સપવપુઃ સ ચકાર સદ્યઃ ॥ ૬॥

ક્ષેત્રજ્ઞ આત્મપુરુષો ભગવાનનન્તઃ
પૂર્ણઃ પ્રધાનપુરુષેશ્વર આદિદેવઃ ।
ધૃત્વા વપુઃ સ વિહરન્વ્રજબાલકેષુ
સમ્મોહયન્વિધિમજો વિચચાર કૃષ્ણઃ ॥ ૭॥

ચિક્ષેપ ધેનુકમસૌ બલિનં બલેન
તાલે પ્રગૃહ્ય સહસા ફણિકાલિયાખ્યમ્ ।
બભ્રામ વહ્નિમપિબદ્દનુજં પ્રલમ્બં
સદ્યો જઘાન સ બલી દૃઢમુષ્ટિના ચ ॥ ૮॥

સઞ્ચારયન્વ્રજવધૂર્મધુરં ક્વણન્ યો
વેણું વને વ્રજવધૂનિજગીતકીર્તિઃ ।
દિવ્યામ્બરાણિ સ જહાર વરાઙ્ગનાનાં
વિપ્રાઙ્ગનાભિરભિતઃ કૃતભક્તભોજઃ ॥ ૯॥

દેવે ચ વર્ષતિ પશૂન્કૃપયા રિરક્ષુ-
ર્ગોવર્ધનં પ્રકૃતબાલ ઇવોચ્છિલીન્ધ્રમ્ ।
બિભ્રદ્ગિરિં સ ગજરાડિવ કઞ્જમેક-
હસ્તે શચીપતિવચોભિરતઃ સ્તુતોઽભૂત્ ॥ ૧૦॥

નન્દં જુગોપ વરુણાત્સ્વજનાય લોકં
દિવ્યં પરં ચ તમસો દિવિ દર્શયિત્વા ।
શ્રીરાસમણ્ડલગતો વ્રજસુન્દરીણાં
રેમે પુલિન્દતટિનીપુલિનેઽઙ્ગનાભિઃ ॥ ૧૧॥

માનં હરન્મદનયૌવનમાનિનીના-
મન્તર્દધે વ્રજવધૂનિજગીતકીર્તિઃ ।
સ્રગ્વી મનોહરવપુર્વિરહાતુરાણાં
સાક્ષાદ્ધરિર્મદનમોહન આવિરાસીત્ ॥ ૧૨॥

વૃન્દાવને શબરરાજવરાઙ્ગનાભિ-
ર્વિષ્ણુર્વિભૂતિભિરિવ દ્યુભિરાદિદેવઃ ।
રેમે સ્તુતઃ સુરવરૈઃ સ ચ રાસરઙ્ગે
કેયૂરકુણ્ડલકિરીટવિટઙ્કવેષઃ ॥ ૧૩॥

નન્દં વિમોક્ષ્ય ફણિને પ્રદદૌ ચ મોક્ષં
    દિવ્યં મણિં સ ચ જહાર હ શઙ્ખચૂડાત્ ।
ગોપસ્તુતો વૃષભરૂપધરં હ્યરિષ્ટં
    ભૂમૌ નિપાત્ય નિજઘાન કરેણ શ◌ૃઙ્ગે ॥ ૧૪॥

કંસઃ પરં ભયમવાપ ચ તેન કેશી
    સમ્પ્રેષિતઃ સઘનમેઘવપુઃ પ્રચણ્ડઃ ।
ઉત્સૃજ્ય તં ચ તરસા પુનરાપતન્તં
    શ્રીબાહુના મુખગતેન જઘાન કૃષ્ણઃ ॥ ૧૫॥

યો નારદેન બહુવર્ણિતભાગ્યલક્ષ્મી-
    ર્વ્યોમાસુરો વ્યસુરકારિ પરેણ યેન ।
અક્રૂરવર્ણિતમહોદય આદિદેવો
    ગોપીજનાતિવિરહાતુરચિત્તચૌરઃ ॥ ૧૬॥

શ્વાફલ્કયે હિતકરાય નિજં સ્વરૂપ-
    મન્તર્દધે જલચયે સ ચ દર્શયિત્વા ।
સ પ્રાપ તત્ર મથુરોપવનં પરેશો
    ગોપાલકૈશ્ચ સબલો મથુરાં દદર્શ ॥ ૧૭॥

સ્વૈરં ચરન્મધુપુરે રજકં નિકૃત્ય
    કૃષ્ણઃ પ્રદાય ચ વરાનથ વાયકાય ।
માલાકૃતં સમનુકમ્પ્ય ચકાર કુબ્જા-
    મૃજ્વીં ધનુશ્ચ સહસા નમયન્બભઞ્જ ॥ ૧૮॥

દ્વારિ દ્વિપઞ્ચ વિનિહત્ય નરેન્દ્રમલ્લૌ
    હત્વા પ્રગૃહ્ય વિનિપાત્ય સ રઙ્ગભૂમૌ ।
કંસં હરિસ્તુ પિતરાવથ મોચયિત્વા
    બન્ધાન્નૃપં પુરિ ચકાર મહોગ્રસેનમ્ ॥ ૧૯॥

નન્દં પ્રસાદ્ય બહુદાનકરો યદૂંસ્તા-
    નાહૂય તર્પ્ય સુધનૈશ્ચ નિવેદયિત્વા ।
વિદ્યામધીત્ય સ દદૌ પ્રમૃતં હ્યપત્યં
    કૃત્વા વધં દનુજપઞ્ચજનસ્ય કૃષ્ણઃ ॥ ૨૦॥

ગોપીજનાન્સમનુગૃહ્ય સ ચોદ્ધવેના-
    ક્રૂરેણ હાસ્તિનપુરે ત્વથ પાણ્ડુપુત્રાન્ ।

કૃષ્ણો વિજિત્ય બલિનં ચ જરાસુતં ચ
    ભસ્મીચકાર મુચકુન્દદૃશાઽઽત્મકાલમ્ ॥ ૨૧॥

નિર્માય ચાદ્ભુતપુરં સ્થિતયેઽત્ર કૃષ્ણો
    નિન્યે ચ કુણ્ડિનપુરાત્કિલ ભીષ્મકન્યામ્ ।
પુત્રેણ શમ્બરમરિં નિજઘાન ચાદાદ્-
    રાજ્ઞે મણીં યુધિ વિજિત્ય સ ઋક્ષરાજમ્ ॥ ૨૨॥

ભામાપતિઃ સ ચ શિરઃ શતધન્વનસ્તુ
    હૃત્વા હ્યુવાહ સવિતુશ્ચ સુતાં પરેશઃ ।
આવન્ત્યરાજતનુજાં સ જહાર કૃષ્ણઃ
    સત્યાં સ્વયંવરગૃહે વૃષભાન્દમિત્વા ॥ ૨૩॥

કૈકેયરાજતનુજાં સ જહાર ભદ્રાં
    શ્રીલક્ષ્મણામખિલભદ્રપતેઃ સુતાં ચ ।
ભૌમં વિજિત્ય સબલં યુધિ શસ્ત્રસઙ્ઘૈ-
    ર્નિન્યે ચ ષોડશસહસ્રવરાઙ્ગનાશ્ચ ॥ ૨૪॥

ભામેચ્છયા સુરતરું ચ સભાં સુધર્માં
    શક્રં વિજિત્ય સ જહાર કલત્રમિત્રઃ ।
યો રુક્મિણં ચ નિજઘાન બલેન ગોષ્ઠ્યાં
    બાણસ્ય બાહુનિચયં શતધાચ્છિનત્સઃ ॥ ૨૫॥

તેનોગ્રસેનકૃતવેઽથ જગદ્વિજેતું
    સમ્પ્રેષિતો નિજસુતઃ કિલ શમ્બરારિઃ ।
યોઽત્રાગતો ભુવિ વિજિત્ય નૃપાન્સમસ્તાન્
    શ્રીકેતુમાલપતયે ચ નમોઽસ્તુ તસ્મૈ ॥ ૨૬॥

ઇતિ ગર્ગસંહિતાયાં વિશ્વજિત્ખણ્ડે એકત્રિંશાધ્યાયાન્તર્ગતં
કેતુમાલવાસિભિઃ પ્રદ્યુમ્નસ્ય પુરતઃ ગીતં શ્રીકૃષ્ણચરિતં સમ્પૂર્ણમ્ ।

Garga Samhita, Hayamedhakhanda, Adhaya 55 verses 8-33

Encoded by Vishwas Bhide vrbhide at rediffmail.com http://satsangdhara.net/
Proofread by PSA Easwaran

*shrIkRiShNacharitam*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*